गृहीतं, त्रि, (ग्रह + कर्म्मणि क्तः ।) स्वीकृतम् । प्राप्तम् । ज्ञातम् । धृतम् । यथा, हितोपदेशे ।१।३।
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत् ॥"

गृहीतदिक्, [श्] त्रि, (गृहीता आश्रिता दिक् शत्रुः प्रहर्त्तुर्वा भयाद्येन ।) पलायितः । तिरोहितः । इति हेमचन्द्रः । ३ । ४६६ ॥

गृहोलिका, स्त्री, (गृहे वलते चलतीति । गृह + वल + कुन् । बाहुलकात् सम्प्रसारणम् । तेन वस्य उत्वम् ।) ज्येष्ठी । इति हेमचन्द्रः । ४ । ६८ ॥

गृह्यं, क्ली, (गृह्यते आक्रम्यते अर्श-आदिभी रोगैरिति । ग्रह + "पदास्वैरिवाह्यापक्ष्येषु च ।" ३ । १ । ११९ । इति क्यप् ।) गुदम् । (गृह्यन्ते संगृह्यन्ते सामवेदाद्युक्तानि कर्म्मविधानान्यत्र इति । ग्रह + क्यप् ।) कात्यायनगोभिलादिकृतसूत्रग्रन्थभेदः । इति मेदिनी । रे । १६ ॥ तत्र तु गोभिलादिकृतसामवेदाद्युक्तकर्म्मकाण्डनिर्णयः ॥

गृह्यः, पुं, (गृह्यते मानवेनेति । ग्रह + "पदास्वैरिवाह्यापक्ष्येषु च" । ३ । १ । ११९ । इति क्यप् । पञ्जरादिबन्धनेन परस्वीकृतत्वादस्य तथात्वम् ।) गृहासक्तमृगादिः । इति मेदिनी । ये । १८ ॥ (अग्निः । यथा, मनौ । ३ । ८४ ।
"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्व्वकम् ।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥")

गृह्यः, त्रि, (गृह्यते स्वाम्यादिभिरिति । ग्रह + क्यप् ।) अस्वैरी । अस्वतन्त्रः । पक्ष्यः । इति विश्वमेदिन्यौ ॥ (यथा, भारविः । २ । ५ ।
"ननु वक्तृविशेषनिस्पृहा
गुणगृह्या वचने विपश्चितः ॥"
गृहे भव इति यत् । गृहोत्पन्नवस्तु ॥)

गृह्यकः, त्रि, (गृह्य + स्वार्थे अनुकम्पायां वा कन् ।) अस्वतन्त्रः । पराधीनः । इत्यमरः । ३।१।१६ ॥

गृह्यकः, पुं, (गृह्य + स्वार्थे अनुकम्पायां वा कन् ।) गृहासक्तपक्षिमृगादिः । तत्पर्य्यायः । छेकः २ । इत्यमरः । २ । ६ । ४३ ॥

गृह्या, स्त्री, (गृह्यते नृपेणेति । ग्रह + क्यप् + टाप् ।) शाखापुरम् । नगरनिकटस्थग्रामः । इत्यमरः ॥

गॄ, क ङ विज्ञापे । विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) विज्ञापो विज्ञापनम् । क ङ, गारयते सूक्ष्मार्थं सुधीः । इति दुर्गादासः ॥

गॄ, गि शब्दे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-सेट् ।) शब्द इह वक्तवाक्यम् । गि, गृणाति वाक्यं लोकः । गीर्णः गीर्णिः । इति दुर्गादासः ॥

गॄ, श निगरणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) निगरणं भक्षणम् । श, गिरत्यन्नं लोकः । दैवाक्तो विगलितो गिलितो वकेन इति तु अस्मात् लङ्गे: कभावे इति भावे क्तप्रत्यये ऋदिरणावित इर् इति वक्तव्याद्रेफस्य लकारे गिल इति स्थिते वेः कृताख्याने इति णौ कर्म्मणि क्ते सिद्धम् । इति दुर्गादासः ॥

गेण्डुः, पुं, (गच्छतीति । गम् + डः । गो गन्ता । ग इन्दुरिवेति गेन्दुः पृषोदरादित्वात् दस्य डत्वे साधुः ।) गेण्डुकः । इति भरतो द्विरूपकोषश्च ॥ (गेन्दुरपि च दृश्यते ॥)

गेण्डुकः, पुं, (ग इन्दुरिवेत्यतः इवे प्रतिकृताविति कन् । अत्र गेन्दुकोऽपि पाठः ।) कन्दुकः । इत्यमरः । २ । ७ । १३८ ॥ गेँडु इति गेँद । इति च भाषा ॥

गेण्डूकः, पुं, (गेण्डुकः ततः पृषोदरादित्वात् दीर्घः । अत्र गेन्दूकोपि पाठः ।) गेण्डुकः । इति जटाधरः ॥

गेद, ऋ ङ उ गतौ । चाले । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ॥)

गेप, ङ ऋ गतिचालयोः । (भ्वां-आत्मं-सकं-सेट् ।) ङ, गेपते । ऋ, अजिगेपत् । इति दुर्गादासः ॥

गेयं, क्ली, (गै + "अचो यत् ।"३ । १ । ९७ । इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति आत ईत्वम् । ततो गुणश्च ।) गीतम् । इति मेदिनी । ये । २० ॥ (यथा, माघे । २ । ७२ ।
"वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ॥")

गेयः, त्रि, (गै + यत् । तत आत ईत्वम् ।) गातव्यः । गायनः । इति मेदिनी । ये । २० ॥ (यथा हरिवंशे हरिवंशपर्व्वणि । ५० । ४१ ।
"इमे त्वां सनयः सप्त सहिता मुनिमण्डले ।
स्तुवन्ति देवदिव्याभिर्गेयाभिर्गीर्भिरञ्जसा ॥")

गेव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिगेवत् । ङ, गेवते । इति दुर्गादासः ॥

गेष, ऋ ङ अन्वेषे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिगेषत् । ङ, गेषते । जिगेषे । अन्वेषोऽनुसन्धानम् । इति दुर्गादासः ॥

गेष्णः, पुं, (गायतीति । गै + "इष्णो गादाभ्यां किद्वा ।" इत्युणादिकोषटीकाकारसूत्रात् इष्णः ।) रङ्गोपजीवी । सामगानकर्त्ता । इत्युणादिकोषः ॥

गेष्णुः, पुं, (गायतीति । गै गाने + "गादाभ्यामिष्णुच् ।" उणां । ३ । १६ । इति इष्णुच् ।) गायनः । नटः । इति मेदिनी । णे । ११ ॥ सामगानकर्त्ता च ॥

गेहं, क्ली, (गो गन्धर्व्वो गणेशश्च । गेन गन्धर्व्वेण गणेशेन वा ईह्यते काम्यते इति । ग + ईह + कर्म्मणि घञ् । यद्वा, गो गन्धर्व्वो गणेशो वा ईहः ईप्सितो यस्मिन् ।) गृहम् । इत्यमरः । २ । २ । ४ ॥ (यथा, हितोपदेशे ।
"तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥")

गेही, [न्] त्रि, (गेहमस्यास्तीति । गेह + इनिः ।) गृही ॥ (स्त्रियां ङीप् । गेहिनी । यथा, आर्य्यासप्तसती । १६६ । [मानम् ॥")
"गेहिन्यया: प्रस्खलन्ती गोत्रस्खलितापराधतो

गेहेनर्द्दी, [न्] पुं, (गेहे नर्द्दतीति गर्ज्जतीति । गेह + नर्द्द + णिनिः अलुक् समासः । अस्य गृह एव गर्ज्जनं नान्यत्र अतस्तथात्वम् ।) कापुरुषः । तत्पर्य्यायः । गेहेशूरः २ पिण्डीशूरः ३ । इति हेमचन्द्रः । ३ । १४१ ॥

गेहेशूरः, पुं, (गेहे एव शूरः । अलुक् समासः । अन्यत्र शूरत्वाभावादस्य तथात्वम् ।) गेहेनर्द्दी । इति हेमचन्द्रः । ३ । १४१ ॥

गै, गाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) गीतं गायति गायनः । इति दुर्गादासः ॥

गैरिकं, क्ली, (गिरौ भवमिति अध्यात्मादित्वात् ठञ् ।) स्वर्णम् । रक्तवर्णधातुविशेषः । गिरिमाटी इति भाषा ॥ तत्पर्य्यायः । रक्तधातुः २ गिरिधातुः ३ गवेधुकम् ४ धातुः ५ सुरङ्गधातुः ६ गिरिष्टुद्भवम् ७ । इति राजनिर्घण्टः ॥ वनालक्तम् ८ गवेरुकम् ९ प्रवप्रमा १० गिरिज्वन् ११ । इति त्रिकाण्डशेषः ॥ लोहितमृत्तिका १२ गिरिजम् १३ ॥ पीतगैरिकस्य पर्य्यायः । सुवर्णगैरिकम् १ सुवर्णम् २ स्वर्णगैरिकम् ३ । इति रत्नमाला ॥ स्वर्णधातुः ४ सुरक्तकः ५ सन्ध्याभ्रम् ६ बभ्रुधातुः ७ शिलाधातुः ८ । अनयोर्गुणाः । मधुरत्वम् । शीतत्वम् । कषायत्वम् । व्रणरोपणत्वम् । विस्फोटार्शोऽग्निदाहनाशित्वम् । स्वर्णवर्णादिकं शुभम् । इति राजनिर्घण्टः ॥ निर्म्मलत्वम् । स्निग्धत्वम् । सुवर्णगैरिकं तद्वत् विशेषतश्चक्षुस्तेजस्कारित्वम् । इति राजवल्लभः ॥
"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्तथा ।
सुवर्णगैरिकन्त्वन्यत्ततो रक्ततरं हि तत् ॥
गैरिकद्वितयं स्निग्धं मधुरन्तुवरं हिमम् ।
चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गैरिकाक्षः, पुं, (गैरिकमिव रक्तवर्णमक्षि पुष्परूपनयनं यस्य ।) जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

गैरी, स्त्री, (गिरौ भवः । गिरि + अण् । गौरादित्वात् ङीष् ।) लाङ्गलिकीवृक्षः । इति रत्नमाला ॥ (लाङ्गलिकीशब्देऽस्या गुणादयो ज्ञातव्याः ॥) विषलाङ्गला इति भाषा ॥

गैरेयं, क्ली, (गिरौ भवमिति । गिरि + ढक् ।) शिलाजतु । इत्यमरः । २ । ९ । १०४ ॥ (यथास्य पर्य्यायाः ।
"शिलाजत्वद्रिजतु च शैलनिर्य्यास इत्यपि ।
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणास्तु शिलाजतुशब्दे ज्ञेयाः ॥) गिरिजाते त्रि ॥

गोकण्टकः, पुं, (गोः पृथिव्याः कण्टक इव ।) गोक्षुरकवृक्षः । (अस्य पर्य्याया यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥
पलङ्कषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)